**R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : जून–जुलै – २०२२**

**सत्र ४ थे**

**विषयः भारतचम्पू** (19R444)

**दिनांक : ०१/०७/२०२२** **गुण : ६०** **वेळ : स. १०.०० ते दु. १२.३०**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. केषामपि त्रयाणां स्वभाषया अनुवादः करणीयः।** **(१५)**

१) रहसि नलिनतल्पे रत्नपर्यङ्ककल्पे दिनविरतिसमीरैः सेव्यमानः स भीमः।
तटभुवि कुसुमानां तादृशैर्गन्धपूरैरधि- कमलसताया हानिदद्रौ निदद्रौ।।

२) या खलु पुरा कुरुधराधिपापराधसमधितक्रोधेन हलधरेण निजायुधेन हठात्कर्षशिक्षया तत्क्षणं समुत्क्षिप्तदक्षिण–क्षितिभागा तदीयभुवनभूषणायमानां भोगावतीमात्मना विजेतुं भागीरथीपाथः पथेनावतीर्य कृतप्रस्थानेवाद्यापि दृश्यते।।

३) मा भून्नाशो युगपदिति नो भीरुभिर्जातु पौरैः पूर्वैर्लब्धावसमरसकृत्प्रार्थनाभिः प्रक्लृप्तम्।
एकैकस्मिन्नहनि वितरत्येकमेकं पुमांसं कृत्वा तस्मै बलिमिह जनस्तुङ्गमन्नस्य राशिम्।।

४) अथ कदाचन मृगयोपललितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतो मृदुभद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम्।

५) अष्टाङ्गयोगानवतोऽस्य राज्ञो मिष्टान्नमासीन्मृदु कन्दमूलम्।
गर्भो वनस्याजनि केलिसौधो दर्भोऽपि सिंहासनतां जगाहे।।

**प्र.२. ससन्दर्भं स्पष्टीकरणं कुरुत।** **(१५)**

१) पश्चतामपि परां धनञ्जयप्रापणेन जतुधाम्नि मेनिरे।

२) कुर्याः वः स्मृत एव कर्मसु हरेः शक्तेरपि स्रंसनाम्।

३) नयानाम्बुभिः स विदधे लोकं नदीमातृकम्।

४) मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः।

५) बाणशापप्रयोगाभ्यां बाधितौ तावुभावपि।

**प्र.३. सविस्तरौ द्वौ लिखत।** **(२०)**

१) पाण्डोः मृगया

२) पाण्डवशिक्षावर्णनम्

३) एकचक्रनिवासः

**प्र.४. अ) रूपपरिचयं लिखत।** **(०४)**

१) पितृभिः

२) ताडयमाना

३) विसर्जयामास

४) ताभ्यः

**आ) संधिविग्रहं कुरुत।** **(०३)**

१) तावुभावपि

२) निष्पतद्भिर्बाष्पैस्तरङ्गितः

३) किमभीष्टतापदे

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** **(०३)**

१) यशःप्रकाशैः

२) मुग्धजनाः

३) तटवीथिका

----------